आत्मत्वेन ज्ञायते इत्यर्थः । क्षेत्र + विद् + क्विप् ।) क्षेत्रज्ञः । जीवात्मा । यथा,—
"तत्त्वं नरेन्द्र ! जगतामथ तस्थुषाञ्च
देहेन्द्रियासुधिषणात्मभिरावृतानाम् ।
यः क्षेत्रवित्तपतया हृदि विश्वगाविः
प्रत्यक् चकास्ति भगवांस्तमवेहि सोऽस्मि ॥"
इति श्रीभागवते । ४ । २२ । ३५ ॥
"यस्मादनात्मनरतिरनर्थहेतुः तत् तस्मात्जगतां जङ्गमानां तस्थुषां स्थावराणाञ्च देहादिभिः आत्मना अहङ्कारेण चावृतानां हृदि यश्चकास्ति प्रकाशते तमवेहि । कथं सोऽस्मीति । सोऽस्मीति पाठे स एवैकोऽस्ति ततोऽन्यदसत् इत्यर्थः । ननु जीवो हृदि चकास्ति नान्यस्तत्राह । क्षेत्रविदं जीवं तपति नियमयतीति क्षेत्रवित्तपः तस्य भावस्तत्ता तया अन्तर्यामिरूपेण । यद्वा क्षेत्रवित्ते अहं ममतास्पदे पातीति क्षेत्रवित्तपः तेन रूपेण । जीवस्तु पारतन्त्र्यान्न पाति । ननु कर्म्म जीवं नियच्छति न आविः प्रत्यञ्चः । तर्हि बुद्धिर्न प्रत्यक् प्रतिलोमं चकास्ति बुद्धिस्तु पराक् विषयाकारेण । तर्ह्यहङ्कारः न विश्वक् व्यापकत्वेन स तु परिच्छिन्नः । एवम्भूतो यो भगवान् तमवेहीति ।" इति तट्टीकायां श्रीधरस्वामी ॥

क्षेत्रसम्भवः, पुं, (क्षेत्रे सम्भवति उत्पद्यते इति । क्षेत्र + सम् + भू + अच् ।) चक्षुष्पः । भिण्डाक्षुपः । इति राजनिर्घण्टः ॥ भूमिजे त्रि ॥

क्षेत्रसम्भूतः, पुं, (क्षेत्रे सम्भूतः जातः ।) कुन्दरः । इति राजनिर्घण्टः ॥ क्षेत्रोद्भवे त्रि ॥

क्षेत्रसीमा, स्त्री, (क्षेत्रस्य भूमेः सीमा मर्य्यादा ।) अङ्गारतुषघटादिद्वाराचिह्नितभूमिमर्य्यादा । यथा "सीमा क्षेत्रादिमर्य्यादा सा चतुर्व्विधा । जनपदसीमा ग्रामसीमा क्षेत्रसीमा गृहसीमा चेति ।" इति मिताक्षरायां व्यवहाराध्याये सीमाविवादशब्दे द्रष्टव्यः ॥

क्षेत्रजीवः, त्रि, (क्षेत्रेण क्षेत्रोद्भवशस्यादिना आजीवतीति । आ + जीव् + कर्त्तरि अच् ।) कर्षकः । इत्यमरः । २ । ६ । ६ ॥

क्षेत्राधिदेवता, स्त्री, (क्षेत्रस्य अधिदेवता अधिष्ठात्री देवता ।) तीर्थाधिपदेवता । यथा,—
"देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम् ।
सिद्धं सिद्धाधिकारांश्च श्रीपूर्व्वं समुदीरयेत् ॥"
इति संस्कारतत्त्वे प्रयोगसारः ॥

क्षेत्राधिपः, पुं, (क्षेत्रस्य अधिपः स्वामी अधिष्ठाता वा ।) मेषादिद्वादशराशीनामधिपतिग्रहगणः । यथा,—
"कुजशुक्रबुधेन्दर्कसौम्यशुक्रावनीसुताम् ।
जीवार्किभानुजेज्यानां क्षेत्राणि स्युरजादयः ॥"
इति ज्योतिस्तत्त्वम् ॥
क्षेत्राधिष्ठात्री देवता च ॥

क्षेत्रामलकी, स्त्री, (क्षेत्रे भूमौ जाता आमलकी । शाकपार्थिववत् मध्यपदलोपी समासः ।) भूम्यामलकी । इति शब्दमाला ॥

क्षेत्रिकः, पुं, (क्षेत्रं अस्यास्तीति । ठन् ।) क्षेत्रस्वामी । यथा मनुः । ९ । ५४—५५ ।
"ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति ।
क्षेत्रिकस्यैव तद्बीजं न वप्ता लभते फलम् ॥
एष धर्म्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च ।
विहङ्गमहिषीणाञ्च विज्ञेयः प्रसवं प्रति ॥"
"तत्र दासीपदं परोढ़ापरं तस्यामन्येन जातौ दासीभर्त्तुर्न बीजिभर्त्तुः ।" इत्युद्वाहतत्त्वम् ॥
कलत्रस्वामी । यथा, मनुः । ९ । १४५ ।
"हरेत्तत्र नियुक्तायां जातः पुत्त्रो यथौरसः ।
क्षेत्रिकस्य तु तद्बीजं धर्म्मतः प्रसवश्च सः ॥"
"हरेदिति । तत्र नियुक्तायां यो जातः क्षेत्रजः पुत्त्र औरस इव धनं हरेत् यस्मात् यत्तस्य कारणभूतं बीजं तत् क्षेत्रस्वामिन एव तत्कार्य्यकरणत्वात् ।" इति तट्टीकायां कुल्लूकभट्टः ॥

क्षेत्रियं, क्ली, क्षेत्रजतृणम् । परदेहचिकित्सा । इति मेदिनी ॥

क्षेत्रियः, पुं, (परक्षेत्रे चिकित्स्यः । "क्षेत्रियच् परक्षेत्रे चिकित्स्यः ।" ५ । २ । ९२ । इति परक्षेत्रस्य क्षेत्रियजादेशः ।) असाध्यरोगः । परदाररतः । इति मेदिनी ॥ (त्रि, परदेहचिकित्स्यो रोगादिः । यथा, भट्टिः । ४ । ३२ ।
"अहं सूर्पणखा नाम्ना नूनं नाज्ञायिषि त्वया ।
दण्डोऽयं क्षेत्रियो येन मय्यपातीति साब्रवीत् ॥")

क्षेत्री, [न्] त्रि, (क्षेत्रमस्यास्तीति इनिः ।) क्षेत्रविशिष्टः । कृषीवलः । यथा, हेमचन्द्रः ।
"कुटुम्बी कर्षकः क्षेत्री हली कृषिककार्षिकौ ॥"
(यथा च मानवे । ९ । ५१ ।
"तथैवाक्षेत्रिणो बीजं परक्षेत्रप्रवापिणः ।
कुर्व्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलम् ॥")
परगवादिना शस्यविनाशे तत्प्राप्तिर्यथा,—
"यावत् शस्यं विनश्येत्तु क्षेत्री तावत् फलं लभेत् ।
पालस्ताड्योऽथ गोस्वामी पूर्व्वोक्तं दण्डमर्हति ॥"
इति याज्ञवल्क्यवचने गवादिदोषेण यावत् शस्यं विनश्यति तावदेव पालकात् प्राप्यं पालकाशक्तौ पालकस्ताड्यः गोस्वामी पूर्व्वोक्तं दण्डादिकं अर्हति ।" इति प्रायश्चित्ततत्त्वम् ॥

क्षेत्री, [न्] पुं, (क्षेत्रं स्त्री अस्यस्य । क्षेत्र + इनिः ।) स्वामी । भर्त्ता । यथा, मनुः । ९ । ३२ ॥
"भर्त्तुः पुत्त्रं विजानन्ति श्रुतिद्वैधन्तु भर्त्तरि ।
आहुरुत्पादकं केचिदपरे क्षेत्रिणं विदुः ॥"
"भर्त्तुरिति । भर्त्तुः पुत्त्रो भवतीति मुनयो मन्यन्ते । भर्त्तरि द्विप्रकारा श्रुतिर्वर्त्तते । केचिदुत्पादकमवोढ़ारमपि भर्त्तारं तेन पुत्त्रेण पुत्त्रिणमाहुः । अन्ये तु वोढ़ारं भर्त्तारमनुत्पादकमपि अन्यजनितेन पुत्त्रेण पुत्त्रिणमाहुः ।" इति तट्टीकायां कुल्लूकभट्टः ॥ (परमात्मा । यथा, गीतायाम् । १३ । ३३ ।
"यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥")

क्षेत्रेक्षुः, पुं, (क्षेत्रे इक्षुरिव ।) यावनालः । इति राजनिर्घण्टः ॥

क्षेत्रोपेक्षः, पुं श्वफल्कपुत्त्रः । इति केचित् ॥ यथा,—
"युगन्धरोऽनमित्रस्य वृष्णिः पुत्त्रोऽपरस्ततः ।
श्वफल्कश्चित्ररथश्चैव गान्दिन्याञ्च श्वफल्कतः ॥
अक्रूरप्रमुखा आसन् पुत्त्रा द्वादश विश्रुताः ।
आसङ्गः सारमेयश्च मृदुरो मृदुविद्गिरिः ॥
धर्म्मवृद्धिः सुकर्म्मा च क्षेत्रोपेक्षोऽरिमर्द्दनः ।
शत्रुघ्नो गन्धमादश्च प्रतिबाहुश्च द्वादश ॥"
इति श्रीभागवते । ९ । २४ । १४—१६ ॥
क्षत्रोपेक्ष इति साधुपाठः । (तत्र क्षत्रेषु क्षत्रियकुलेषु उपेक्षा यस्य ॥)

क्षेपः, पुं, (क्षिप + घञ् ।) निन्दा । (यथा, याज्ञवल्क्यः । २ । २०७ ।
"क्षेपं करोति चेद्दण्ड्यः पणानर्द्धत्रयोदश ॥")
विक्षेपः । (यथा, गो: रामायणे । ४ । ६२ । १२ ।
"पञ्चक्षेपपरिक्षिप्ताः सुपार्श्वेऽभ्यपयास्यति ॥")
लेपनम् । गर्व्वः । प्रेरणम् । इति मेदिनी ॥
विलम्बः । हेला । लङ्घनम् । इति हेमचन्द्रः ॥
गुच्छः । इति त्रिकाण्डशेषः ॥ (यथा, मेघदूते । ३६ ।
"कुन्दक्षेपानुगमधुकरश्रीमुषामात्मविम्बम् ॥")

क्षेपकः, त्रि, (क्षिपतीति । क्षिप् + ण्वुल् ।) क्षेपकर्त्ता । इति व्याकरणम् ॥

क्षेपणं, क्ली, (क्षिप + भावकर्म्मादिषु ल्युट् ।) प्रेरणम् । तत्पर्य्यायः । क्षिपा २ । इत्यमरः । ३ । २ । ११ ॥ यापनम् । यथा,—
"विधवा यौवनस्था च नारी भवति कर्कशा ।
आयुषः क्षेपणार्थन्तु दातव्यं स्त्रीधनं सदा ॥"
इति विवादचिन्तामणिधृतहारीतवचनम् ॥
प्रस्तरादीनां दूरप्रेरणार्थरज्जुनिर्म्मितशिक्यम् । फिङ्गा इति भाषा । यथा, श्रीभागवते । ३ । १९ ।
"प्रववुर्व्वायवश्चण्डास्तमः पांशवमैरयन् ।
दिग्भ्यो निपेतुर्ग्रावाणः क्षेपणैः प्रहिता इव ॥"
"पांशुकृततमश्च प्रेरितवन्तः । क्षेपणैर्यन्त्रैः ।"
इति तट्टीकायां श्रीधरस्वामी ॥ (परित्यागः । यथाह मनुः । ४ । ११९ ।
"उपाकर्म्मणि चोत्सर्गे त्रिरात्रं क्षेपणं स्मृतम् ॥"
"उपाकर्म्मणि उत्सर्गे त्रिरात्रमध्ययनक्षेपणम् ॥"
इति कुल्लूकभट्टः ॥ मत्स्ययोद्धॄणां सहसा भूपातनरूपनियुद्धकौशलविशेषः । यथा, महाभारते । ४ । १२ । २८ ।
"क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिस्वनैः ।
तलैर्वज्रनिपातैश्च प्रस्वष्टाभिस्तथैव च ॥"
"क्षेपणं कथ्यते यत्तु स्थानात् प्रच्यवनं हटात् ॥"
इति तट्टीकाकृन्नीलकण्ठधृतमल्लशास्त्रम् ॥)

क्षेपणिः, } स्त्री, (क्षिप + बाहुलकात् अनिः
क्षेपणी, } ङीप् वा ।) नौकादण्डः । इत्यमरः । १ । १० । १३ ॥ डाँड़ इति भाषा । जालभेदः । इति मेदिनी ॥ (अस्त्रविशेषः । यथा, रामायणे । ६ । ७ । २४ ।
"क्षेपण्यस्तोमरांश्चैव शूलानि मुषलानि च ॥")

क्षेपणीयं, क्ली, (क्षिप + अनीयर् ।) पाषाणप्रक्षेपणास्त्रम् । यथा, रघुवंशे ४ । ७७ ।